Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 2 | ISSN : 2581- 6306

# डयते कथमाकाशे? इति ग्रन्थस्य सामाजिकं वैशिष्ट्यम्

खोकन परामानिक:
शोधच्छात्र:, साहित्यविभाग:, राष्ट्रियसंस्कृतविश्वविद्यालय:,तिरुपति:।

**Article Info**
Volume 4, Issue 2
Page Number : 196-201
**Publication Issue :**
March-April-2021
**Article History**
Accepted : 01 April 2021
Published : 10 April 2021

**सारांश:**– वयं सामाजिकप्राणिन:। समाजं प्रति अस्माकम् उत्तरदायित्वं कर्तव्यता च वर्तते। यथा – स्वस्थ्याय अस्माकं शरीरस्य विभिन्नानि अङ्गानि रोगमुक्तानि क्रियन्ते, तथा समाजस्य समीकरणाय केचन विशिष्टा: नियमा: भवन्ति, ते चावश्यमेवास्माभि: सर्वदा परिपालनीया:। कीदृशा: ते इति विचिकित्सायां **डयते कथमाकाशे?** इति बालसाहित्यमाधारीकृत्य अत्र यथामति प्रत्यपादि।

**विशेषशब्दा:**– अहङ्कारभाव:, स्वपरिवारस्था:, सामाजिकोन्नतये, अतिलोभ:, लोभ:, समाजसमृद्धि:, पिपीलिका, मैत्रीसम्बन्ध:, गुरूपदेश:।

व्यक्तय: परिवारे समाजे च भवन्ति। व्यक्तिसमाजयो: परस्परयो: केचन सम्बन्धा: भवन्ति। ते च– पारिवारिकसम्बन्ध:, परिवारेतरबाह्यसम्बन्ध: च। तत्र पारिवारिकसम्बन्ध: त्रय: भवन्ति, बाह्यसम्बन्धोऽपि त्रय: इति वक्तुं शक्यन्ते। बाह्यसम्बन्धेषु गुरूशिष्यसम्बन्ध: अन्यतम:। महामुनिना व्यासेन उक्तं यत्– पितृभ्याम् अपेक्षया गुरो: महत्वम् अधिकं वर्तते। यतो हि पितरौ मनुष्यशरीरमात्रस्य जन्मदातारौ स्त:, विनष्टे शरीरे सत्ताऽपि नश्यति। किन्तु आचार्योपदेशात् य: द्वितीयवारं जनिं लेभे स: अजर:, अमर:, दिव्याश्च भवति।[1]

**येन प्रीणात्युपाध्यायं तेन स्याद् ब्रह्म पूजितम्।**
**मातृत: पितृतश्चैव तस्मात् पूज्यतमो गुरु:॥**[2]

गुरु: स्वान् शिष्यान् सदा सत्यमार्गे गमयति। सत्यमार्गे बहव: दु:खादय: मनुष्यान् विचलयितुं आगच्छन्ति। तत: प्राथम्य वहिरागन्तव्यमं। यश्च कविना डा राजकुमारमिश्रेण **डयते कथमाकाशे?** इति बालसाहित्यग्रन्थे **गुरूपदेश:** इति बाललतिलीलोद्भावकं काव्ये उपदेश: प्रोक्त:। तद् यथा–

सत्यमार्गं परोत्कर्षं कार्यं भवति। यदा दु:खादय: आगच्छन्ति तत्र। तदा हिमाद्रे: निश्चलस्थितिरिव तद्वत् अकम्पेन अस्माभि: भाव्यम्। एतै: सत्यमार्गं श्रेयष्कर: भवति।[3]

सर्वदा निर्धनमनुष्या: धनोन्मत्तात् अधीरा: भवन्ति। परन्तु नहि वर्तते धने सुखस्य उपलब्धि:। अत: सत्यं परित्यज्य अस्माभि: धनलोभ: न करणीय:।[4]

---

1. महा.शान्तिपर्व:,108,18–20,23
2. महा.शान्तिपर्व:,108,26
3. सदा सत्यमार्गं श्रयध्वं श्रयध्वं
परोत्कर्षकार्यं कुरुध्वं कुरुध्वम्॥ (डयते कथमाकाशे?,गुरूपदेश:)

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

जगन्मण्डलेऽस्मिन् इदान्तनकाले वञ्चनां कृत्वा मनुष्या: आनन्दिता भवन्ति। तेषां आनन्दाधार: भवति दु:स्थानां मनुष्यानां दु:खम्। अत: वञ्चनां विहाय स्वनिजै: प्रयासै: स्वकार्ये निमग्नो भवितव्य:। तदैव तत्र सत्यस्य ध्वज: उपस्थापित: भवति। तन्मार्गे च अस्माभि: गन्तव्यम् इति गुरो: वचनम्।[5]

अनुसरति गच्छतीति संसारम् इति व्युत्पत्तिबलात् नवीनायमानं वर्तते सर्वदा संसारस्य तथापि नवीनिकरणे आगच्छति ध्वंसनिष्ठभयोत्पादकता। अज्ञानता जायते सा च निर्वार्यते ज्ञानदीपप्रकाशै:। अत्र ज्ञानोत्पादकं भवति सत्यमार्ग:। अतएव सत्यमार्गं अस्माभि: अनुसर्तव्यम्।[6] एवं प्रकारेण गुरूमुखात् सत्यमार्गस्य प्रपञ्चेन ज्ञानस्वरूपम् अवबुद्ध्वा अस्माभि: अखिलेऽस्मिन् विश्वमञ्चे यशरूपप्रज्ज्वलम् उपस्थापयेत् इति गुरो: आशांसि।[7]

सत्यविषये **तैत्तिरीयोपनिषदि** उक्तम्–

**"सत्यं वद। धर्मं चर। स्वाध्यायान्माप्रमद:। सत्यान्न प्रमदितव्यम्।"**[8]

**ॐ सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामया:।**

**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दु:खभाग्भवेत्।**

**ॐ शान्ति: शान्ति: शान्ति:॥**

अस्माद् वेद वाक्यात् अस्माकं भारतीयानां समाजं प्रति कर्तव्यतां अवगम्यते। सामाजिकं मूल्यबोध: भवति सर्वेषां शुभकामना। सामाजिकं मूल्यबोधं प्रादर्शयितुं कविना **नैव दीनता भवेत्** इति अत्र वर्णयन् प्राह–

**नैव दीनता भवेत् कदापि नैव याचना**

**कुर्महे तदीश्वराद् वयं सदैव कामनाम्॥**[9]

अत्र विचारं कुर्मश्चेत् पश्याम: इमां उदारभावनां यदि अस्माभि: जन्येत् तर्हि तथा सद्गुणद्रुम: सद्गुणान् सर्जयति। तथैव राष्ट्रमण्डलस्य प्रत्येकं सुखान् वञ्चिता: भवेयम्। अधुना प्रश्न: भवति उदारता कथम् आगच्छति? तद् उत्तरं भवति ज्ञानात्। तत्र च ज्ञानमय राशि: वेद: इति उच्यते। वेदश्च भवति जगत् सुखैककारकम्। अत्रैव निहिता: वर्तन्ते सर्वेषां दु:खनिवारणहेतव:। अत: मेघगर्जन इव वेदगर्जनं कर्तव्यमिति। अतएव प्राह कविना–

**मेघगर्जनं यथा तथैव वेदगर्जनं**

**नो मुखात् समुद्भवेद् जगत्सुखैककारकम॥**[10]

---

4. सदोपेक्षितानां तथा निर्धनानां धनोन्मत्तसन्त्रासशूलाहतानाम्।
स्ववात्सल्यपूरै: कटाक्षैरजस्रं सुखस्यानुलेपं कुरुध्वं कुरुध्वम्॥ (डयते कथमाकाशे?,गुरूपदेश:)

5. जगन्मण्डलेऽस्मिन् समन्तादिदानीं समुत्कीलितो वञ्चनाच्छद्मजाल:।
प्रयासै: निजै: सत्वरं तत्र सत्य- ध्वजस्थापनार्थं यतध्वं यतध्वम्॥(डयते कथमाकाशे?,गुरूपदेश:)

6. युगं सर्वथेदं नवीनायमानं भयोत्पादकं लक्ष्यते ध्वंसनोत्कम।
अतोऽज्ञानतो ज्ञानदीपप्रकाशै: स्वकान् सत्यमार्गं नयध्वं नयध्वम॥(डयते कथमाकाशे?,गुरूपदेश:)

7. यश: प्रोज्ज्वलं भारतीयं पुन: स्यात् प्रकाशते येनाऽखिलो विश्वमञ्च:।
भवेदस्य लक्ष्यस्य सिद्धिर्न यावद् जनेभ्य: प्रवाचं ददध्वं ददध्वम्॥(डयते कथमाकाशे?,गुरूपदेश:)

8. तैत्ति.उ.- 2.1.1

9. डयते कथमाकाशे?- नैव दीनता भवेत्

10. डयते कथमाकाशे?- नैव दीनता भवेत्

**मैत्रीसम्बन्धः-** त्रिषु मैत्रीसम्बन्धः, गुरूशिष्यसम्बन्धः, शास्यशासकसम्बन्धश्च। सम्बन्धेषु त्रिषु मैत्रीसम्बन्धः [11] सामाजिकमूलबोधजाग्रित्यै प्रमुखो भवति। अतएव कवि **कालियदमनम्** इति श्रीकृष्ण सख्यभावं प्रदर्शयन् कथयति प्रोच्छाल्य प्रोच्छाल्य इति। केशवः स्वसखिभिः क्रीडासक्तः आसन् लघु कुन्दकं क्रीडन् आसीत्। तथा इतस्ततः धावनकारणात् प्रमादात् यमुना जले कुन्दकं निपातयति। पतिते कुन्दके मित्राणां मनसि स्फुटितं दुःखं दृष्ट्वा कृष्णः स्वात्मनि दुःखं अनुभवत्।[12] एतस्मात् व्याख्यानात् मित्रेषु कथं सख्यभावं स्थापितव्यमिति दृष्टान्तः दृष्टः। अतः सखिनां दुःखं स्वस्मैव इति उदारताभावेन समाजे प्रदर्शितव्यम्। यथा दुःखम् असह्य केशवः कुन्दकमोद्धर्तुं कालीय फणा व्यप्ते गहने यमुना जले भीतिं विना मरणं मे भविष्यति इति अचिन्तयन् अकुर्दत्। तथैव मित्राणां आगति दुःखे स्वदुःखमेव चिन्तयन् सा समस्या निवृति कर्तव्या इति।[13]

कविना राजकुमारमिश्रमहाभागेन डयते कथमाकाशे? इति नामाङ्किते बाललतितलीलोद्भावककाव्ये **पिपीलिका** इति नामधेये श्लोकसमूहैः समाजे कीदृशः परस्पाराणां सोदरः मैत्रीसम्बन्धश्च स्थापितव्यः, तथा च कीदृशी स्वस्मिन् कार्यरता भवितव्या इति निर्दिशयितुं पिपीलिकायाः जीवनवृत्तान्तेन अस्मान् समाजस्यस्थितान् मनुष्यान् सम्बोधयितुं प्रारब्धम् इदम् काव्यम्।

पिपीलिका यद्यपि लघुरूपा। तथापि यतः कुतश्चित् प्राप्तं भोज्यमन्नकणविशेषं नीत्वा सन्तोषचित्तवृत्तिरूपा भवति। स्वस्मात् अपेक्षया अधिकं भारं स्वीकरणात् वारं वारं पतिते सत्वेपि प्रयासेन उत्तिष्ठति। येनां व्यग्रतां दृष्ट्वा अन्या पिपीलिका ताम् साहाय्यमाचरति। येन तस्य सन्तोषरूपभोज्यपदार्थवहनरूपक्रिया सफलीभवति।[14] अत्र अस्माकं दृष्ट्वा कार्यमिदम् अल्पप्रयाससाध्यं भवति चेदपि तेषां तत्र श्रद्धा अकल्पनीयः।

एतस्मात् काव्यात् अस्माभिः समाजे सहोदरसम्बन्धः कथं स्थापितव्यः स पिपीलिकया शिक्ष्यते। सर्वत्र सर्वदा स्वमतिरिच्य परेषां कार्ये साहाय्यर्थं हस्तं प्रसारितव्यम्।[15]

तथा च सर्वं कार्यं सर्वदा श्रेष्ठत्त्वेन एव स्वीकार्यम्। न कुत्रापि अरूचिः प्रदर्शनीयः। तथा सति समाजस्य क्षुद्रं क्षुद्रमपि कार्यं दृढबद्धमनसः क्रियते चेत् साफल्यं प्राप्नोति इति समाजसमृद्धिः भवति। सफलं प्राप्तौ नैकाः विपत्तयः आगच्छन्ति, तं सर्वं अतिक्रमते चेदेव सफलता प्राप्यते। तदेव बोधयितुं कविना उक्तम्-

**पतति च भाराणामाधिक्याद्**
**उत्तिष्ठति प्रयासात्।**
**श्रान्तिं नैव मनागपि मनुते**
**स्फूर्तीनां संयोगात्॥**[16]

---

[11]. न हि सत्पुरुषैः सङ्गः क्वचिद् भवति निष्फलः। (रामा.मं.उत्तर.8.342)

[12]. मित्राणां कन्दुकपतनाद् यत् स्फुटितमभूद् दुःखं वदने।
पृच्छां विना द्रुतं तद् हर्तुं कूर्दति जलेऽच्युतो गहने॥(डयते कथमाकाशे?, कालियदमनम्)

[13]. अर्तिरार्ते प्रिये प्रीतिरेतावन्मित्रलक्षणम्। (महा.शान्तिपर्वः-103,50)

[14]. कार्येऽस्मिन् तां व्यग्रां दृष्ट्वा पिपीलिकाऽन्या मिलते।
तत्साहाय्यं कृत्वा बन्धो! हर्षं नवं समयते॥ (डयते कथमाकाशे?, पिपीलिका)

[15]. अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः॥(हितोपदेशः-1.36)

समाजे बहुविधाः मनुष्याः निवसन्ति। तेषां च प्रत्येकं स्वभावः भिन्नः विद्यते। जन्मनः जायते स्वभावः। तस्य परिवर्तनं कदाचित् पारपर्श्विकैः मनुष्यैः भवितुमर्हति, तत्तु वक्ताधीनः। समाजस्य निर्माणे एतादृशानां प्रत्येकं कामपि भूमिकां निर्वाहति। परन्तु चारित्रकशिक्षाविकासाय अस्माभिः प्राचीनानां जीवनवृत्तान्तं अनुसर्तव्यम्। यथा प्रोक्तं मनुस्मृतौ–

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**

**स्वंस्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥**[17]

कविना राजकुमारमिश्रमहोदयेन समाजे स्थितानां विडालसदृशानां मनुष्यानां जीवनवृत्तान्तं समाजस्य सम्मुखे आनेतुं कतिभिः श्लोकनिबद्धैः **अतिलोभिनी बिडाली** इति नाम्नी बाललतितलीलोद्भावककाव्यं जग्रन्थः।

अधुना काव्यं वर्णयन् कविना उक्तं– बिडाली अतिचतुरा भवति। सर्वदा वञ्चना कर्मणि सिद्धा। स्वविलासाय सा मूषकान् हत्वा शनैः शनैः गिलति। एकस्मिन् दिने सा चतुरा सुरेशगृहे लघुकरकपात्रे दुग्धं दृष्ट्वा अतिलोभात् तत्र मुखं क्षिप्तवती। ततः तस्मिन् तस्य मुखं अवरुद्धं जातम्। बहु प्रयत्ने सत्त्वेऽपि तद्दुःखात् न निर्गतः। ततश्च सा तस्मिन् मृत्युभयं स्वसमीपं दृष्ट्वा सा पूर्वकालिकं कृतलोभं स्मृत्वा स्ववचनं करोति मया एता आरभ्य लोभः न क्रियते। ततश्च रामः तां दृष्ट्वा ततः मुक्तिं प्रदाय कम्बलवस्त्रेण शारिरीकचिकित्साम्अकारः। सति समीचिने ताभ्यां धन्यवचो वितरन्ती बहुवेगैः ततः धावति।

यतोहि अखिलेऽस्मिन् भावलोके लोभापेक्षया मनुष्यानां अन्यः कोऽपि शत्रुः नास्ति। प्रायः सर्वे अवगुणाः लोभात् एव जायन्ते, यथा– "लालच् बुरी वाला"। लोभहेतुत्वात् सर्वे सज्जनाः गुणिनश्च स्वगुणान् नाशयित्वा कुमार्गे प्रवृत्ताः भवन्ति। जीवनस्य प्रत्येकस्मिन् क्षेत्रे लोभस्य सर्वग्रासीसाम्राज्यं सुविस्तृतं प्रसारितं च वर्तते। यथा– भोजनस्य लोभः, सम्पत्त्याः लोभः, श्रेष्ठपदप्राप्तेः लोभः, अयोग्या सत्वेऽपि यशसः लोभः। इति लोभः असीमः। महाभारतानुसारेण सर्वेषां दोषाणां अपराधाणां च मूलः दोषः लोभः एव।

**एको लोभो महाग्राहो लोभात् पापं प्रवर्तते।**

**लोभात् क्रोधः प्रभवति लोभात् कामः प्रवर्तते।**

**लोभान् मोहश्च नाशश्च मानः स्तम्भःपरासुता॥**[18]

इतः अस्माभिः शिक्षणीयं अतिलोभः न कार्यः। तथा च लोभिनः विपदे पतन्ति चेत् तस्य तत् पूर्वावस्थां विस्मृत्य पुनः तस्य साहाय्यर्थं अस्माभिः आगन्तव्यम्। यद्यपि लोभे पापः पापे मृत्युः इति बाल्यादेव श्रुयते, तथापि समाजे शिक्षाभावात् तस्य विस्मरणं जायते तत् कर्मणि च प्रवर्तते। अतएव शिक्षामूलसमाजः इति ध्वनिः आचरितव्याः। यथा शिक्षाविषये सुभाषितरत्नभाण्डागारे उक्तम्–

**विद्या ददाति विनयं विनयाद्याति पात्रताम्।**

**पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततस्सुखम्॥**[19] **इति॥**

सामाजिकोन्नतये सर्वेषां भूमिका महति विद्यते इत्यत्र नास्ति कस्याऽपि संशयः। तस्मात् न कमपि शरीरं शुद्धतां दृष्ट्वा विचारः कर्तव्यः। यथा पीकः पक्षीकूलेषु कृष्णवर्णीयःपरन्तु कुहु कुहु कौरवसादैः सर्वेषां मनः हरति। तेन सकलोऽयं लोकः भवति अशोकः। तथैव अस्माभिरपि भाव्यम्। येन समाजे सर्वेषां लोकानां दुःखादिकं समाप्तं स्यात्। अतएव उक्तं कविना–

---

16. डयते कथमाकाशे ?– पिपीलिका

17. मनुस्मृतिः,2.20

18. महा.शान्तिपर्वः,158,2–4

19. सुभाषितरत्नभाण्डागारः

**वयमपि बाला: तथैव लोके**

**पिकगुणधरा भवाम:।**

**लब्ध्वा येनादरं हि लोकात्**

**कुलं निजं सुखयाम:॥**[20]

**"प्रक्रियते कार्य्यादिकभनयेति प्रकृति:"** तदर्थ: स्वभाव:। यथा तदेव चरके विमानस्थाने प्रथमेऽध्याये उक्तम्– **"प्रकृतिरुच्यते स्वभावो य: स पुनराहा-रौषधद्रव्याणां स्वभाविको गुर्व्वादिगुणयोग:। तद्यथा माषमुद्गयो: शूकरैणयोश्च।"**

स्वभावमूलजा: मनुष्या: भवन्ति। स्वभावोऽयं प्रकृत्या अस्माभि: शिक्ष्यते। यथा मनोज्ञाप्रकृतिरूपानदी परोपकाराय प्रवहति। यथा वृक्षा: विविधगुणयुक्तं स्वादफलं ददति। यथा वायु: अस्मभ्यं प्राणं ददति,यथा रवि: सुमार्गं लोकान् नयति स्वप्रकाशै:।[21] एते नद्यादय: सर्वे प्रकृत्यङ्गभूता भवन्ति। तत: अस्माभि: इयं शिक्षा प्राप्यते "सर्वदा परार्थं स्वजीवनं उत्सर्ग: कर्तव्य:" इति। किञ्च स्वबान्धवा:, स्वपरिवारस्था:, कुटुम्बा: मित्रं कुमार्गात् सुमार्गे स्वप्रयत्नै: आनितव्य:। अतएव कविना **प्रकृति:** नाम्ना बाललिततलीलोद्भावकं काव्ये प्रकृतौ स्थितान् सर्वेषां वाय्वादीनां वर्णनेन अस्मासु तद् गुणा: स्थापयितुं प्रयत्नीकृता:।

समाजे बद्धजीवेषु प्राणेषु दृश्यते प्राय: परस्परयो: अहङ्कारभाव:। तस्मात् च जायते क्रोध–लोभ–घृणता। परन्तु अन्तत: गत्वा अहङ्कारादीणां समाजे पतनं भवति इति तत् वाल्मीके रामायणादौ पञ्चमहाकाव्येषु अर्थात् समग्रसाहित्यवाङ्मये तत् परिलक्षितम्। तदेव तत् चित्रं दृष्टान्तदाष्टान्तिकरूपेण बाल्यान् अववोधयितुं कवि: राजकुमारमिश्रेण डयते कथमाकाशे? इति बाललिततलीलोद्भावकं काव्ये "शशककच्छपकथा" माध्यमेन प्रस्फुटितवान्।

एक: शशक: कच्छपाय अवदत्– त्वं शनै: शनै: चलसि। अहम् तु वेगेन धावामि। कच्छप: अवदत्–रे शशक! अहम् शनै: शनै: चलामि परन्तु आलस्यं न करोमि। इत्थं तयो: कथनाकथनं विवादे पर्यवसितम्। अन्ते तयो: मध्ये अयं निश्चय: अभवत् यत्– मार्गस्य अन्ते य: जलाशय: अस्ति, तत्र य: आदौ गमिष्यति स: विजयी भविष्यति। श्रुत्वैव शशक: अधावत्, तमनृसृत्य कच्छप: अपि मन्दं मन्दं चलनं प्रारब्धवान्। किञ्चित् दूरं गत्वा शशक: अचिन्तयत् यत् – कच्छप: मन्दम् आगच्छति, स: चिरात् अत्र आगमिष्यति। तावत् अहम् किञ्चित् विश्रान्तिं स्वीकरोमि इति विचिन्त्य शशक: वृक्षच्छायायां शिश्ये। श्रान्त: स: आशु गभीरनिद्रायां सुष्वाप। कच्छप: निश्चितगन्तव्यम् आगत:। सुप्तं शशकं दृष्टवा अग्रेसरन्, जलाशयतीरं प्राप्य उपाविशत्। शशक: चिरात् निद्रां त्यक्त्वा यदा जलाशयस्य समीपं गतवान्, तदा तत्र स्थित: कच्छप: वदति – ये सततं कार्ये संलग्ना:, तेषाम् एव विजय: भवति। शशक: अब्रवीत्– प्रिय कच्छप! तव एव विजय:। अहं तु आलस्यात् पराजित: अस्मि।

यद्यपि कच्छप: शशकापेक्षया धीरगतिसम्पन्न आसीत्, तथापि तस्मिन् विश्वास: आसीत् यत् – स तत् कार्यं स्वसामर्थ्येन करिष्यति। तदेव श्रूयते–

**आत्मजन्या भवेदिच्छा इच्छाजन्या भवेद् कृति:।**

**कृतिजन्या भवेच्चेष्टा तज्जन्यैव क्रिया भवेत्?**

---

20. डयते कथमाकाशे?, पिकगुणधरा भवाम:

21.उपकाराय समेषां नद्य: प्रवहन्त्यहो! मनोज्ञा प्रकृति:।

स्वादु फलं विविधं गुणयुक्तं वृक्षा ददत्युदारा प्रकृति:॥

वायु: प्राणवतो न: कुरुते सञ्चलनेन सुरम्या प्रकृति:।

निजाऽऽलोकतो रविर्वदान्यो नयति सुमार्गं लोकान् प्रकृति:॥

एतस्मात् शिक्षणीयं यत्.- शशकः आशुधावनरूपस्वप्रकृतिवशात् मोहाच्छन्नः सन् प्रतियोगितासमापनात्प्रागेव स्वं विजयिरूपेण अमन्यत। कदाचित् कच्छपस्य भागग्रहणमेव स्पर्धायामनुचितमिति निर्धार्य अहङ्कारविमूढः सन् स्पर्धानुचितकृत्यं कृत्वा कच्छपात् पराजितः संजातः। अतः सदैव मनसि निधेयं यत् अस्मासु ये उत्कृष्टगुणाः सन्ति, तेषां संवर्धनं यथा भवेत् तथा प्रवर्तितव्यम्। अन्यथा तादृशगुणाभिमानी पुरुषः शशक इव जीवनयुद्धरूपप्रतियोगितायामस्यां सर्वदा प्रायः नैराश्यमेव अनुभवेत् इति शम्।

**परिशीलितग्रन्थसूची**


1. कौमारम्, मिश्रोऽभिराजराजेन्द्रः, लोकप्रियसाहित्यग्रन्थमाला, 2003
2. डयते कथमाकाशे?,डा. राजकुमार मिश्र, मान्यता प्रकाशन्, दिल्ली, 2015
3. चमत्कारिकः चलदूरभाषः, ऋषिराजः, पार्श्व पब्लिकेशन, अहमदाबाद, 2013
4. मनुस्मृतिः, मोतिलाल बनारसीदास, दिल्ली, 1983
5. महाभारतम्, वेदव्यासः, गीताप्रेसः, 2001
6. संस्कृतसाहित्येतिहासः, आचार्य रामचन्द्रमिश्र, चौखाम्बा, वाराणसी, 1970
7. बालकथासप्ततिः, जनार्दन हेगडे, संस्कृतभारती, बेङ्गलूरु. 2013
8. रामायणम्, वाल्मीकिः (अनुवादक-दासमार्कण्ड) भूवनेश्वर, 1997